# 2022

## M.A.

## 4th Semester Examination

## SANSKRIT

## PAPER—SAN-405

*Full Marks* : 40

*Time* : 2 Hours

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः। (देवनागर्या)

## SAN-405A (MODERN SANSKRIT LITERATURE)

### Group – A

1. प्रश्नद्वयं समाधेयम् – 2×2

(a) अमरमङ्गलनाटके प्रथमतोऽङ्कत्रयस्य नाम किम्? नाटकस्य कस्मिन् कस्मिलङ्के विष्कम्भकः दृश्यते?

(b) शक्तुपूर्णमुखः कः? तस्य तत्र वेशः कीदृश आसीत्?

(c) 'इदमप्यनुचितमाचरितम्' – कस्त्रोक्तिः कस्मिन् प्रसंङ्गे?

**2.** यथेच्छं श्लोकद्वयं व्याख्यायताम् – 2×4

(a) कपटो हृदये फपटो वचने कपटो नयने कपटो वपुषि।

कपटस्त्वचि चेति समृद्धगुणः परवञ्चनवर्त्मनि दक्षतरः॥

(b) चलति निविड-कृष्णं पक्ष्म वक्राभ्रमेतत्

किशलय-कमनीयः कम्पते किञ्चिदोष्ठः।

स्फुरतिमृदुलनासा दीर्घनिश्वासमेषा

त्यजति नलिननेत्रा नेत्रयोर्मुद्रणञ्च॥

(c) यो हि कण्ठगतं हारं विस्मृत्य व्याकुलीभवन्।

इतस्ततोऽनुसन्धत्ते तदवस्थां गतोऽस्म्यहम्॥

**3.** एकः प्रश्नः समाधेयः — 1×8

(a) अमरमङ्गलनाटकस्य ऐतिहासिकपटभूमिः आलोच्यताम्।

(b) अमरमङ्गले वीराचरितस्य नायिकात्वमुपपद्यते न वेति — विचार्यताम्।

**Group – B**

**4.** प्रश्नद्वयं समाधेयम् — 2×2

(a) रुक्मिणीहरणमिति महाकाव्यस्य कस्याश्चिदेकस्याःटीकायाः टीकाकारस्य च नाम लिखताम्।

(b) नृपो भीष्मकः किमर्थं मधुरिपुं जहास?

(c) राज्ञः भीष्मकस्य कति पुत्रा आसन्? तेषु ज्येष्ठपुत्रस्य नाम किम्?

**5.** यथेच्छं द्वयोर्व्याख्या कार्या — 2×4

(a) शिव: शिवापदतलग: शवोऽपि सन्भवन्महाम्बरमपि निरम्बर:

रमार्द्धभाक् तनुरपि मारमारक: स वो भवो विभूर्विभूतिद:॥

(b) अभून्नृपे सति च विकारकारणे दृढाशये न हि विकृति: कियत्यपि।

(c) तथाप्य भून्नृपरसौ सुदुर्ग्रह:।

**6.** एक: प्रश्न: समाधेय: — 1×8

(a) राज्ञ: भीष्मकस्य जितेन्द्रियत्वमुपस्थाप्यताम्।

(b) राज्ञा भीष्मकेन शासितस्य विदर्भविषयस्य प्रकृति:वर्ण्यताम्।

---

## SAN-405B (VYĀKARAṆADARŚANA)

### Group – A

1. प्रश्नद्वयं समाधेयम् – 2×2

(a) को नाम विवर्त:?

(b) श्रेष्ठं तप: व्याकरणं कथम्?

(c) शब्दानां यतशक्तिकत्वं नाम किम्?

2. यथेच्छं प्रश्नद्वयं समाधेयम् – 2×4

(a) टीका लेख्या – कालशक्ति:

(b) व्याख्यायाताम् – अर्थप्रवृत्तितत्त्वानां शब्दा एव निवन्धनम्।

तत्त्वावबोध:शब्दानां नास्ति व्याकरणादृते।।

(c) 'तद्द्वारमपवर्गस्य - - - इति कारिकां सम्पूर्णतया विलिख्य

कस्य अपवर्गद्वारत्वं कथं वा आलोच्यताम्।

**3.** एकः प्रश्नः समाधेयः — 1×8

(a) शब्दार्थसम्बन्धानां नित्यत्वं सोपपत्तिकं प्रदर्शनीयम्।

(b) शब्दब्रह्मणः स्वरूपं वाक्यपदीयदिशा प्रतिपाद्यताम्।

## Group – B

**4.** प्रश्नद्वयं समाधेयम् — 2×2

(a) कं नत्वा नागेशेन परमलघुमञ्जूषाग्रन्थः विरचितः? ग्रन्थस्य परमलघुत्वं कथम्?

(b) कारकाणि कति? तेषां नामानि महाभाष्यानुक्रमं लिखत।

(c) विभक्तीनामर्थः कीदृशः?

**5.** यथेच्छं प्रश्नद्वयं समाधेयम् — 2×4

(a) क्रियानिमित्तत्वं कारकत्वमिति कथं न स्वीकार्यम्?

(b) सम्बोधनं नाम किम्? तत्र का विभक्तिः? सोदाहरणं सम्बोधनविभक्त्यर्थः परिष्क्रियताम्।

(c) व्याख्यायताम् – क्रियानिष्पादकत्वं कारकत्वम्।

**6.** एकः प्रश्नः समाधेयः – 1×8

(a) कर्तृकारकस्वरूपं परमलघुमञ्जूषानुसारं सोदाहरणमालोच्यताम्।

(b) कर्मविषये तार्किकमतं किम्? तत् केन प्रकारेण नागेशेन निराकृतम्?

———